CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३१२

[illegible] २०११ = १५ [illegible]

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशाय नमः॥ ॥ॐ हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य आद्य
॥१॥ मंत्रस्य श्रीऋषिः उत्तरचतुर्दशमंत्राणां आनंदकर्दमचिक्लीतेंदिरासु
ता ऋषयः आद्यानां तिसृणां अनुष्टुप् चतुर्थस्य बृहती पंचमषष्ठयो
स्त्रिष्टुप् अंतिमंत्रस्य प्रस्तारपंक्तिश्छंदः सर्वमंत्राणां श्रीरग्निश्चेत्युभे
देवते व्यंजनानि बीजानि स्वराः शक्तयः बिंदवः कीलकं श्रीमहालक्ष्मी
प्रीत्यर्थं श्रीसूक्तजपे होमे विनियोगः॥ अथांगुलिन्यासः। हिरण्यायै
अंगु० चंद्रायै तर्जनी० रजतस्रजायै म० हिरण्यस्रजायै अना०। हिरण्या
क्षायै क० हिरण्यवर्णायै करत० एवं हृदयादि॥ अथ पंचदशस्थाने
षु पंचदशमंत्रैर्न्यासः॥ मूर्धाक्षिकर्णनासामुखगलदोर्हृदयनाभिमू
लेषु॥ पायूपस्थजानुजंघाचरणेषु न्यसेत्सूक्तैः क्रमशः॥ ॐ हिरण्यवर्णा रामः
मूर्ध्नि। तां म आवह नेत्रयोः। अश्वपूर्वां कर्णयोः। कां सोस्मितां नासापु ॥१॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आर्द्रां पुष्करिणीन्वाः छकरणिं पुष्टिजान्वीः॥

रे ४ चंद्रां प्रभासां मुखे ५ आदित्यवर्णां कंठे ६ उपैतु मां बाह्वोः ७ क्षुत्पिपा
साहृदये ८ गंधद्वारां नाभौ ९ मनसः गुह्ये १० कर्दमेअपाने ११ आपस्रजं
तु ऊर्वोः १२ आर्द्रां पुष्करणीं यष्टिं जंघयोः १४ तां आवह पादयोः १५॥ ॥
अथ ध्यानं॥ अरुणकमलसंस्था तद्रजः पुंजवर्णा कर कमलधृतेष्टा
भीतियुग्मां बुजाच॥ मणिमकुटविचित्रालंकृता कल्पजालैर्भवतु भुव
नमाता संततं श्रीश्रीयेनमः॥१॥ एवं ध्यात्वा देहे विन्यासं कृत्वा॥ श्रीसू
क्तं जपेत्॥ ॥अथ पूजनं॥ षट्कोणयंत्र भाति रव्य आग्नेयादिषु षट्
सु कोणेषु हिरण्यायै नमः १ चंद्रायै नमः २ रजतस्रजायै ३ हिरण्य
स्रजायै ४ हिरण्या भायै ५ हिरण्यवर्णायै ६ इति प्रथमावरणं॥ ॥अ
अ थ पूर्वादि दलेषु॥ पद्मासनायै १ पद्मवर्णायै २ पद्मस्थायै ३ पद्मा
क्ष्यै नमः ४ तर्पयंत्यै नमः ५ तृप्तै नमः ६ ज्वलंत्यै नमः ७ स्वर्णप्रा

वर

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इतितृतीयावरणं पुनः पूर्वादिदशदिक्पालायनमः २

कारायैनमः॥५॥इतिद्वितीयावरणं॥पूर्वादिदिक्षु॥इंद्रायनमः अ
॥३॥ ग्नयेनमः यमायनमः निर्ऋतयेनमः वरुणायनमः वायवेनमः।
ईशानायनमः कुबेरायनमः शक्तयेनमः दंडायनमः खड्गायनमः पाशायनमः
अंकुशायनमः गदायैनमः त्रिशूलायनमः॥चक्रायनमः इत्यूर्ध्व
मध्यपद्मायनमः इतिमध्ये॥इतिचतुर्थावरणं॥एवंआवरण
सहितांदेवींपंचदशमंत्रपूर्वकंपंचदशोपचारैः पूजयेत्॥तद्यथा
आवाहनासनार्घ्यपाद्याचमनमधुपर्काभिषेकानि॥वासोभूषं
गंधाःसुमनानामृतधूपदीपभोज्यानिस्तोत्रनमनानिकुर्यात्सुभक्ति
युक्तःपंचदशभिरथमंत्रैः॥हिरण्यवर्णामित्यनेनावाहनं॥आवा
हनेस्थापनेसंनिधीकरणेसंनिरोधनेसंमुखीकरणेऽवगुंठ रामः
नेयोनिमुद्रांप्रदर्शयेत्॥तांआवाहइत्यासनं॥अश्वपूर्णामित्य ॥२॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भु३

र्घ्यं २ कांसोस्मितामिति पाद्यं ३ चंद्रां प्रभासामित्याचमनं ४ आदित्य
वर्णेमिति पंचामृतं ॥५॥ उपैतु मामिति स्नानं ॥६॥ क्षुत्पिपासामि
ति वस्त्रं ७ गंधद्वारामिति भूषणं ८ मनसः काममेति गंधं ९ कर्द
नै मेति पुष्पं १० आपः सृजंत्विति धूपं ११ आर्द्रां पुष्करिणीं दीपं १२ आ
र्द्रां पु० यष्टीं नैवेद्यं १३ ततो देव्यै फलतांबूलादि निवेद्य मंगलार्त्तिक्यं
विधाय पंचदशऋग्भिः आज्यं हुत्वा आचमनीयं दत्त्वा तां आवह
त्यनया स्वहृदये देवीमुद्वास्य १५ ततः कृतांजलिः सन् सूक्तं जपे
त् ॥ ॥ अथ श्रीसूक्तपुरश्चर्याविधिर्लिख्यते ॥ नित्यपूजाविधिवन्या
सजालं कुर्यात् ॥ द्वादशसहस्रं श्रीसूक्तं जपं कुर्यात् ॥ सहस्रार्धपुर
श्चरणविधिर्न दृश्यते ॥ तद्दशांशेन होमं ॥ तद्दशांशेन ब्राह्मणभो
जनं ॥ होमद्रव्याण्याह ॥ पुरश्चर्यासुसिद्ध्यर्थं कुर्याद्बिल्वमुत्तमं ॥ २

यद्वा पंचदशशतानि कुर्यात् । यद्वा दशशतानि कुर्यात् ॥ ३

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कौक्षैर्बिल्वपत्रैश्च बिल्ववृक्षफलैस्तथा॥ मधुत्रयसमायुक्तैस्तत्स
॥२॥ मिद्भिश्च पायसैः॥ होतव्यं नियमात्तत्र दशांशं घृतसंयुतं॥ अन्यैर्म
नोरमैर्दिव्यैः स्वाद्यैः समधुरैः फलैः पूर्णाहुतिं ततः कुर्याद्बलिदानं
ततः परं॥ कुमारीणां प्रसन्नानां रूपाणां चाभिनित्यशः॥ वल्लभं
शोडुवानां च सुवचोभाषणं ध्रुवं॥ तथा सुवासिनीनां च पूजनं स
म ६ मुदीरितं॥ मधुरं भोजनं देयं शर्कराघृतसंयुतं॥ दशवा सप्त वा चा
थ पंच वा त्रिस्त्र एव वा॥ एका वाप्यथ शक्त्या न कन्या पूजा सुवासि
नी॥ यथाशक्त्या च तासां वै दद्यात्कंचुकवाससी॥ अलंकारादिकं
चैव सुमनोमालिकां शुभां॥ यथाशक्त्याथवा कुर्यात्सर्वमेतद्विपू
जनं॥ यत्कृतं जपहोमादि पूजासंसं पाशिवर्धकं॥ द्विजसंतर्पणं चै रामः
वत्प्रियै सर्वं निवेदयेत्॥ तथा च तर्पणं स्याः कार्यं तन्नाममंत्रिः स ॥३॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दा॥ नित्यं होमेत एते पितृका: देवता:सर्वा: दुग्धेनवा सुगंधकेनत
र्पयेत्॥ तेनोदकेन अन्नं मुहुर्मुहु: प्रसिंचयेत्॥ ॥इति पुरश्चर्या
विधानं॥ ॥अथ मंत्रकोशोक्ता श्रीसूक्त पुरश्चरणविधिर्लिख्यते
॥नित्यं नैमित्तिकं काम्यं सापेक्ष्यं पूर्वपूर्वत:॥ ॥अथार्च भजं
नं वै धनकरोत्यापत्परं परा॥१॥ गुरूपदिष्टमंत्रस्याहं निशांसा
धनं तु यत्॥ नित्यं नैमित्तिकं वर्षेशारदिस्यार्च्चपूजनं॥ साका
मनां मनसा कृत्वा पुरश्चर्या समाहित:॥ काम्यंत स्मोच्यते तत्र:
धनादि विषइ सिती॥३॥ पुरश्चरणमादौ तु कर्मणां सिद्धिका
रकं॥ तिष्ठेद हमि राजो तु शुक्लेराशी तकाम्यत:॥४॥ आरभ्येच्छ
प्रतिपदि यावदेकादशी भवेत्॥ ताव द्वादशासाहस्त्रमन्त्रों जुहुया
च्छुचिव्रत:॥ ६॥ सितप्रतिपदारभ्य यावदष्टमिका भवेत्॥ पंच
॥५॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रः भक्तिधात्सूक्तं प्रत्यहं प्रयतो जपेत् ॥६॥ ततो दिनद्वयं स ष
॥४॥ ष्टिसंख्यामुदीरितं ॥ षट्षष्टिसंख्यामेकस्मिन्दिवसे तु जपेत्सु
धीः ॥७॥ अष्टममेकादशीयावदर्कसंख्यामितो जपः ॥ सहस्रमुदीरि
तः प्रोक्ता सहस्रद्वादशीयावहि ॥८॥ ॥अथ तद्दशमांशेन पद्म
स्त्रिमधुरप्लुतैः ॥ पायसाज्यैर्बिल्वदलैर्होमः कार्यो विधिस्मृतः
॥९॥ उपहारानुपहारे भुक्त्वान् भक्ष्यान्ययो दधि ॥ दंपतीभ्यां प्रय
५नं त्नेन स चैतौ चलमेर्खियं ॥१०॥ अस्यार्थः ॥ तत्र नित्यनैमित्तिक
मित्यादि च तुर्णा मस्कृतार्थः ॥ ततः आरभ्याश्लोकात्पद्यत्वेनेन
स... साः संगृहीताः तत्राप्याश्विनप्रथमाद्य द्वयवेशाख्यश्रावण
श्रावदस्तु प्रशस्ताः तत्र शुक्लपक्षोतिप्रशस्तः तत्र शुक्लप्रतिपद रामः
मारभ्यद्वादश्यवधियत्रा तिथिवृद्धिहानेर्नैस्तः तन्त्रारंभो विधेयः ॥४॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ततः प्रतिपदारभ्य अष्टमीपर्यंतं प्रत्यहं श्रीसूक्तं पंचदशावृत्त्यैवं पंचस
प्ततिसंख्या जपेत्। ततो नवम्यां दशम्यां च सप्तषष्ठिधा जपेत्॥ ततः
एकादश्यां षट्षष्टिसंख्यं जपेदेवमष्टानां द्वादशसहस्रसंख्यापूर्ति
र्भविष्यति यथा प्रत्यहं पंचसप्तति पाठानामावृत्त्या पंचविंशत्यधिके च ए
कादशशतसंख्याकोऽर्चः स्युरेवमष्टदिवसे नवसहस्रसंख्या
का भविष्यंति॥ ततो दिनद्वये सप्तषष्टिरूपपाठानां दशाधिकद्विसहस्र
संख्यास्त्वृचः स्युस्ततश्चैकस्मिन्दिवसे षट्षष्टिपाठानां नवत्यधिका
नवशतीत्येवं मिलित्वाष्टौ॥ एकादशदिवसे द्वादशसहस्रसहस्र
संख्यामष्टानां पुरश्चरणं भविष्यतीति शिवं॥ अथ प्रयोगः॥ आच
म्य प्राणानायम्य देशकालौ संकीर्त्य अभिष्टकामनासिद्ध्यर्थं महा
लक्ष्मीप्रीत्यर्थं पुरश्चर्यांगत्वेन मंत्रन्यासादिकं करिष्ये इति संकल्प्य॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ल० हिरण्यवर्णामितिसूक्तस्यपंचदशर्चस्याद्यायाःश्रीऋषिःततःश्चतुर्द
।५।। शानामानंदकर्दमचिक्लीतेंदिरासुताऋषयःआद्यायाःश्रीर्देव
तेअन्यासांश्रीर्देवताआद्यास्तिस्रोनुष्टुभःचतुर्थीबृहतीपंचमीष
ष्ठ्योस्त्रिष्टुभौततोष्टौअंत्याप्रस्तारपंक्तिरंत्येविनियोगः॥शिरसि
श्रीआनंदकर्दमचिक्लीतेंदिरासुताहृषिभ्योनमः मुखेअनु
६भानुष्टुप्बृहतीत्रिष्टुप्प्रस्तारपंक्तिछंदोभ्योनमःहृदिश्रीअग्निदेव
ताभ्योनमःगुह्येवंजनोनिबीजेभ्योनमःगुह्येस्वरेभ्यःशक्तिभ्यो
नमःपादयोःकीलकेभ्योनमः॥ॐहिरण्यायैनमःअंगुष्ठाभ्यांन
मः॥ॐचंद्रायैतर्जनी०॥रजतस्रजायैमध्यमा०ॐहिरण्यस्रजायै
अनामिका०हिरण्याक्ष्यैनमःकनिष्ठिकाभ्यां०हिरण्यवर्णायैनमः राम:
करतलकरपृष्ठाभ्यांफट्एवंहृदयादिविन्यस्यततःक्रमेणा ।।५।।

त

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

क्षि।

मूर्ध्नि कर्णनासामुखग्रीवांसबाहुहृदयनाभिगुह्यगुदोरुजानु
जंघाचरणेषु पंचदशार्चौ न्यसेत् ॥ ततोध्यात्वा मानसोपचारैः सं
पूज्य जपेत्॥ ॥अथ ध्यानं॥ अरुणकमलसंस्थातद्रजःपुंजव
र्णा करकमलधृतेष्टाभीतियुग्मांबुजा च । मणिमुकुटविचित्रा
लंकृताकल्पजालैर्भवतु भुवनमाता संततं श्रीःश्रियै नः॥०॥ चतु
र्भुजेषु द्वयोः पद्मे अधो वराभये ततः षट्कोणगर्भे हृद्लेख्या
पूजा समारभेत्॥ छ॥ अथुतायुतहोमस्तु विधेयः स्थंडिलोपरि।
एकलक्षमिदं कुंडं दशलक्षावधिस्मृतं॥१॥ दशानां दशकेनैव
हस्तहस्तविवर्धयेत्॥ दश हस्तकोटिहोमे वेदिकानाभिसिरिते
॥इतिमेरुतंत्रोक्तवचनं॥ छ॥ श्रीसर्वजामंत्राणां जातवेदा
ग्निऋषिः अनुष्टुप्छंदः श्रीदेवता अलक्ष्मीपरिहारपूर्वकल

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

क्ष्मीप्रीत्यर्थं तर्पणमहं करिष्ये॥ सुवर्णपतये नमः॥१ श्रियै नमः २ लक्ष्म्यै
नमः ३ महालक्ष्म्यै नमः ४ वरदायै नमः ५ विष्णुपत्न्यै नमः ६ स्वर्णमाल
न्यै नमः ७ रजतस्रजायै न० ८ स्वर्णगृहायै न० ९ स्वर्णप्रकाशायै न०
१० पद्मवासिन्यै० ११ पद्मरागायै० १२ पद्मप्रियायै० १३ ऐश्वर्यायै न०
१४ मुक्तिदायिन्यै० १५ भुक्तिमुक्तिदायिन्यै० १६ विभूतिदायिन्यै० १७ ऋ
द्धिदायिन्यै० १८ समृद्धिदायिन्यै० १९ तुष्टिदायिन्यै० २० पुष्टिदायि
न्यै० २१ धनदायिन्यै० २२ धनेश्वर्यै नमः २३ सुश्रद्धायै नमः॥२४॥
भोगिन्यै नमः २५ भोगदायिन्यै नमः २६ स्वधायै न० २७ विधायै न
मः २८ सिंधुजायै नमः २९ राजलक्ष्म्यै नमः ३० गजांतलक्ष्म्यै नमः ३१
साम्राज्यलक्ष्म्यै नमः॥ अर्घ्यपात्रस्थितदुग्धपात्रस्थपयसा वा सुगंध राम:
जलेन वा तर्पयेत्॥ लक्ष्मीस्तोत्रं यंत्रे वा से पूज्य दशावारं श्रीसूक्तं पं ॥६॥

त

Kashi Maharani Collection, Ramnagar Fort, Varanasi